# संस्कृत वार्ता:

दिनाङ्क : 27/05/2026 सायम् - 06:20

<u>आदौ मुख्यवार्ता:</u>

- सर्वकारेण सार्वजनिक-वितरण-प्रणाल्याः आधुनिकीकरणार्थं पञ्चशताधिक-पञ्चविंशतीसहस्रकोटरूप्यकाणां केन्द्रीय-परिव्ययेन सह सार्थक-पी.डी.एस. योजनायाः विस्ताराय स्वीकृतिः प्रदत्ता।
- सर्वोच्च-न्यायालयेन मतदातृ-सूच्याः विशेष-गहन-पुनरीक्षणाय निर्वाचनायोगस्य अधिकारः न्यायोचितं अङ्गीकृतम्।
- देशस्य विविधेषु भागेषु वर्धमानं तापमानं अवलोक्य प्रधानमन्त्री नरेन्द्रमोदी नागरिकान् यथाशक्यं सावधानान् भवितुं साग्रह प्रबोधितवान्।
- केन्द्रीयान्वेषणाभिकरणेन राष्ट्रिय-पात्रता-सह-प्रवेश-परीक्षा प्रश्नपत्र-गोपनभङ्ग-प्रकरणे अपरौ द्वौ अभियुक्तौ निगडितौ।
- आईपीएल-क्रिकेट-प्रतिस्पर्धायाम्, अद्य सायं मोहाली-नगरस्य न्यू-चण्डीगढ़-क्रीडाङ्गणे सनराइजर्स-हैदराबाददलं राजस्थान-रॉयल्सदलेन सह प्रतिस्पर्धिष्यति।

---------------------------------------------------

<u>मन्त्रिमण्डल-समितिः</u>

आर्थिक-प्रकरण-मन्त्रिमण्डल-समित्या अद्य षोडश-वित्तायोगस्य पुरस्कारचक्रावधौ सार्थक-पी.डी.एस.' इति अम्ब्रेला-योजनायाः निरन्तरतायै त्रिंशदधिक-पञ्चशतोत्तर-पञ्चविंशतिसहस्रकोटि- रूप्यकाणां केन्द्रीय-विनियोगः करिष्यते । नवदिल्ल्यां वार्ताहरान् सम्बोधयन् सूचना-प्रसारण-मन्त्री अश्विनी-वैष्णवः अवदत् यत्, इयं योजना राज्य-संस्थाभ्यः राज्यान्तर्गत-खाद्यान्न-परिवहनाय साहाय्यं प्रदास्यति, सहैव उचित-मूल्यापणानां सुदृढीकरणं करिष्यति, तथा च सार्वजनिक-वितरण-प्रणाल्याः आधुनिकीकरणेऽपि सहयोगं करिष्यति।

मन्त्रिणा प्रोक्तं यत् अस्याम् योजनायां कृत्रिम-मेधायां आधारिताः निर्मल-आशा-सक्षमाख्याः त्रयः घटकाः भविष्यन्ति । तेन स्पष्टीकृतं यत् निर्मल इति कृत्रिम-मेधा-चालितः वास्तविक-समय-पी.डी.एस.-लाभार्थी-पञ्जीकरण-मञ्चः अस्ति, । सहैव 'आशा' इति बहुभाषीय-कृत्रिम-मेधा-आधारिता जन-परिदेवना-निवारण-प्रणाली तथा नागरिक-संवाद-मञ्चः वर्तते, एवं च 'सक्षम' इति कृत्रिम-मेधा-युक्तं आपूर्तिशृङ्खला-प्रबन्धन-तन्त्रम् अस्ति। अनेन सहैव आर्थिक-प्रकरण-मन्त्रिमण्डल-समित्या राज्यान्तर्गत-खाद्यान्न-परिवहन-व्ययस्य तथा उचित-मूल्य-आपण-विक्रेतृणाम् लाभांश-सीमायाः पूर्तये केन्द्रीय-सहायता-नियमेषु संशोधनस्य, तथा च पूर्ववत् वित्तपोषण-प्रारूपस्य निरन्तरतायाः अपि दृढ-निर्णयः कृतः।

-------------------------------------------------

<u>सर्वोच्चन्यायालय-एस.आई.आर</u>

सर्वोच्च-न्यायालयेन अद्य भारत-निर्वाचनायोगेन प्रदत्तस मतदातृ-सूच्याः विशेष-गहन-पुनरीक्षणस्य वैधता प्रमाणीकृता । तेनोक्तं यत् एतादृशं विशेष-पुनरीक्षणं निष्पक्ष-स्वतन्त्र-निर्वाचनानां संवैधिनक-अनिवार्यतां संवर्धयति। न्यायालयेन प्रतिपादितं यत्, जनप्रतिनिधित्व-अधिनियमः पञ्चाशदुत्तर-एकोनविंशतितमः चतुर्विंशत्यधिक-त्रिशतम्- अनुच्छेदस्य नियमानुसारं निर्वाचनायोगस्य पार्श्वे विशेष-गहन-पुनरीक्षणस्य पूर्णा शक्तिः वर्तते।

मुख्यन्यायाधीशस्य सूर्यकान्तस्य तथा च न्यायाधीशस्य जायमाल्य-बागचि इत्यनयोः पीठेन एतत् निर्णय-वचनं तासां याचिकानां सन्दर्भे प्रख्यापितं, यासु गतवर्षे जून-मासे निर्वाचनायोगेन बिहार-राज्ये विशेष-गहन-पुनरीक्षणार्थं प्रसारिता अधिसूचना समाहूता आसीत्। मुख्यन्यायाधीशेन सूर्यकान्तेन प्रख्यापिते निर्णय-पत्रे स्पष्टीकृतं यत्, यदा स्वयमेव विधिः कारणानि अभिलेख्य, केनापि प्रकारेण, कस्मिन्नपि समये विशेष-पुनरीक्षणाय आयोगं अधिकरोति, तदा इयं विशिष्ट-प्रक्रिया केवलं तस्मात् कारणात् अवैधतां न प्राप्नोति यत् एषा सामान्य-पुनरीक्षणस्य पारम्परिक-प्रक्रियाणाम् सर्वथा अनुरूपा नासीत्।

-------------------------------------------------

## प्रधानमन्त्री-उष्णतरङ्गः

देशस्य विविधेषु भागेषु वर्धमानं तापमानं अवलोक्य प्रधानमन्त्री नरेन्द्रमोदी नागरिकान् यथाशक्यं सावधानान् भवितुं साग्रह प्रबोधितवान्। एकस्मिन् सामाजिक-सञ्जालीयसन्देशे सन्दिशे श्रीमोदी सर्वान् आर्द्रीकरणं रक्षितुम्, गृहात् बहिः गमनावसरे च जलं स्थापितुं परामर्शं प्रदत्तवान् । दैनिक-जीवने उष्णताप-जनित-कष्टानां विषये चिन्ताम् प्रकटयन् प्रधानमन्त्री अवोचत् यत्, एतादृशायां ऋतौ संवेदनशीलता एव महत्तरः आधारः भवति। तेन पिपासितेभ्यः चषकपरिमितं जलं प्रदातुं परामर्शो दत्तः। सः सर्वान् स्व-परिजनैः आत्मीयैः च सह निरन्तरं सम्पर्कं स्थापयितुं, तेषां कुशलवार्तां प्रष्टुम्, भूरि-जलं पातुम्, मध्याह्ने प्रचण्डे आतपे बहिर्गमनं वर्जयितुम्, तथा च यथाशक्यं विश्रामं कर्तुं स्मारितवान्। तेन पशुपक्षिणां कृतेऽपि करुणां प्रदर्श्य गृहात् बहिः, अलिन्देषु , छदिषु , आपणेषु अथवा कार्यालयेषु जलपूरितं लघु-पात्रं स्थापयितुं निर्देशो विहितः। श्रीमोदिना तेषां प्रयासानां भूरि-प्रशंसा कृता, ये पिपासित-जन-कल्याणाय स्व-गृहाणाम् आपणानां च बहिः मृत्तिका-घटेषु शीतलं जलं स्थापयन्ति। प्रधानमन्त्री सर्वान् एतेषु कष्टकर-दिनेषु परस्परं करुणा-प्रदर्शनार्थं साग्रहं प्रार्थितवान्।

---------------------------------------------------

## नीटप्रकरणम्

केन्द्रीयान्वेषणाभिकरणेन राष्ट्रिय-पात्रता-सह-प्रवेश-परीक्षा प्रश्नपत्र-गोपनभङ्ग-प्रकरणे अपरौ द्वौ अभियुक्तौ निगडितौ। अनेन तावत् केन्द्रीयान्वेषणाभिकरणेन अस्मिन् प्रकरणे दिल्ली-जयपुर-गुरुग्राम-नासिक-पुणे-लातूर-अहिल्यानगरेभ्यः एतावता त्रयोदश-आरोपिणः निगृहीताः। अस्मिन्नेव क्रमे लातूर-वास्तव्यः कश्चन चिकित्सकः डॉ. मनोज-शिरूरे इत्येषः नीट-प्रश्नपत्र-भेद-प्रकरणे निगडितः। अन्वेषणाभिकरणानुसारं, कोचिंग-संस्थापकस्य पुत्रेण सह त्रयाणां छात्राणां कृते अभियुक्त-पी.वी.-कुलकर्णी इत्यमुना रसायनशास्त्रस्य प्रश्नान् प्रापयितुं मुख्य-भूमिकां निर्व्यूढा।

अपरः निगृहीतः अभियुक्तः तेजस-हर्षदकुमार-शाहः वर्तते, यः पुणे-नगरस्य डॉ. अभङ्ग-प्रभु-मेडिकल-अकादमी'इति कोचिंग-संस्थायां भौतिकशास्त्रस्य प्राध्यापकः अस्ति।

केन्द्रीयान्वेषणाभिकरणेन एतावता देशस्य एकोनपञ्चाशत् स्थानेषु सहसान्वेषणं विहितम्, यत्र अनेके आपत्तिजनक-अभिलेखाः, अङ्कीय-सङ्गणकाः, दूरभाष-यन्त्राणि च स्वायत्तीकृतानि।

---------------------------------------------------

**राष्ट्रपतिः**

राष्ट्रपतिपदासीना द्रौपदी-मुर्मुः सबलं प्रोक्तवती यत् देशस्य विकासाय पूर्वोत्तर-क्षेत्रस्य विकासः सर्वथा अनिवार्यः वर्तते। अद्य गङ्गटोक-नगरे सिक्किम-विश्वविद्यालयस्य दीक्षान्त-समारोहं सम्बोधयन्ती राष्ट्रपति-मुर्मूः छात्रान् स्वकीय-विचारैः, नवोन्मेषेण, परस्पर-विश्वासेन च राष्ट्र-निर्माणे योगदानं विधातुं परामर्शं प्रदत्तवती। मुर्मु-महोदया अवदत् यत् शिक्षा एव सशक्तीकरणस्य परममार्गः अस्ति।

---------------------------------------------------

**गोयल-कनाडा**

कनाडा-यात्रायाः द्वितीये दिवसे भारतस्य वाणिज्योद्योगमन्त्री पीयूष-गोयलः कनाडा-देशस्य टोरन्टो-नगरे वरिष्ठ-व्यापारिक-नेतृभिः संस्थागत-निवेशकैः च सह उच्च-स्तरीयोपवेशनं विहितवान्। यात्रा-प्रसङ्गे श्रीगोयलः कनाडा-देशस्य अन्ताराष्ट्रिय-व्यापारमन्त्रिणा मनिन्दर-सिद्धू इत्यमुना सह साक्षात्कृत्य भारत-कनाडा-देशयोः वर्धमान-पूरकताम् अधिकृत्य चर्चां कृतवान्, तथा च सुदृढ-सर्वकारोद्योग-सहयोगेन चालितस्य अधिक-सशक्तस्य पूर्वानुमान-योग्यस्य च व्यापार-पारिस्थितिकी-तन्त्रस्य आवश्यकतायाम् बलं प्रदत्तवान्। मन्त्रालयेन प्रोक्तं यत्, उभाभ्यां पक्षाभ्यां त्रिंशदधिक-द्विसहस्रतमवर्षं यावत् द्विपक्षीय-व्यापारं पञ्चाशत्-अरब-अमेरिकी-डॉलर-परिमितं यावत् वर्धयितुम्, तथा च ऐषमः षड्विंशत्यधिक-द्विसहस्रतमवर्षस्य आन्तं यावत् सीपा-सन्धिं दृढीकर्तुमपि लक्ष्यं स्मृतम् । अत्रान्तरे प्रवासी-भारतीयान् सम्बोधयन् श्रीगोयलः कनाडा-देशे भारतीय-समुदायस्य शक्तिम्, भारत-कनाडा-व्यापार-मार्गस्य सुदृढीकरणे तस्य महतीं भूमिकाञ्च प्रतिपादितवान् । तेन सबलं प्रोक्तं यत्, प्रवासी-भारतीय-समुदायस्य न केवलं भारतेन सह व्यापार-निवेश-सम्बन्धान् विस्तारयितुं, अपितु सुदृढ-सांस्कृतिक-

आदानप्रदानं, सामुदायिक-सहभागितां, कनाडा-देशे भारतीय-उद्यमानां विकासञ्च प्रवर्धयितुम् एका विशिष्टा महत्वपूर्ण-भूमिका वर्तते।

---------------------------------------------------

<u>क्रिकेट-क्रीडा</u>

आईपीएल-क्रिकेट-प्रतिस्पर्धायाम्, अद्य सायं मोहाली-नगरस्य न्यू-चण्डीगढ़-क्रीडाङ्गणे सनराइजर्स-हैदराबाददलं राजस्थान-रॉयल्सदलेन सह प्रतिस्पर्धिष्यति। एषा स्पर्धा सायं सार्ध-सप्तवादने समारप्स्यते। इतः पूर्वं, गतरात्रौ धर्मशाला-नगरे आयोजिते द्वन्द्वे रॉयल-चैलेंजर्स-बेंगलुरुदलेन गुजरात-टाइटन्सदलं द्वानवति-धावनाङ्कैः पराजित्य निर्णायकस्पर्धायां प्रवेशं कृतम्।

।। इति वार्ता: ।।